ततो लीलावती कन्यां भर्त्त्सयामास तां भृशम्।
पृष्टि ! रात्रौ स्थिता कुत्र किन्ते मनसि वर्त्तते॥
द्विजालये व्रतं मातर्दृष्टं वाञ्छितसिद्धिदम्॥
तत् श्रुत्वा कन्यकावाक्यं व्रतं कर्त्तुं समुद्यता।
सा मुदा वणिग्भार्य्या सत्यनारायणस्य च॥
व्रतं चक्रे च वै साध्वी बन्धुभिः स्वजनैः सह।
भर्त्तृजामातरौ क्षिप्रमागच्छेतां ममाश्रमम्॥
इति देवं वरं याचे सत्यदेवं पुनः पुनः।
अपराधन्तु भर्त्तुर्म्मे जामातुः क्षन्तुमर्हसि॥
व्रतेन तस्यास्तुष्टोऽसौ सत्यनारायणः प्रभुः।
दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम्॥
वन्दिनौ मोचय प्रातर्वणिजौ नृपसत्तम !।
देयं धनञ्च तत् सर्व्वं विधिना द्विगुणीकृतम्॥
नो चेत् त्वां नाशयिष्यामि सराज्यधनपुत्त्रकम्।
एवमाभाष्य राजानं ध्यानगम्योऽभवत् प्रभुः॥
ततः प्रभातसमये राजा च स्वजनैः सह।
उपविश्य सभामध्ये प्राह दूतजनं प्रति॥
बद्धौ महाजनौ शीघ्रं मोचयध्वं वणिक्सुतौ।
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ॥
समानीय नृपस्याग्रे प्रोचुश्च विनयान्विताः।
आनीतौ द्वौ वणिक्पुत्त्रौ मुक्तौ निगड़बन्धनात्॥
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तमम्।
स्मृत्वा च पूर्व्ववृत्तान्तं विस्मयाद्भयविह्वलौ॥
राजा वणिक्सुतौ वीक्ष्य प्रोवाच सादरं वचः।
दैवात् प्राप्तं महत् कष्टमिदानीं नास्ति ते भयम्॥
इदानीमेव मुक्तस्त्वं क्षुरकर्म्मादिकञ्चर॥
ततो नृपवरः श्रीमान् स्वर्णरत्नविभूषणैः।
अलङ्कृत्य वणिक्पुत्त्रौ वचसाप्रीणयद्भृशम्।
पुरानीतञ्च यद्द्रव्यं द्विगुणीकृत्य दत्तवान्॥
प्रोवाच तौ ततो राजा गच्छ साधो निजा-
श्रमम्।
राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः॥
यात्रां कृत्वा ततः साधुर्म्मङ्गलाचारपूर्व्विकाम्।
ब्राह्मणेभ्यो धनं दत्त्वा सहर्षो नगरं ययौ॥
कियद्दूरे गते साधौ सत्यनारायणः प्रभुः।
जिज्ञासां कृतवान् साधो किमस्ति तरणौ तव॥
ततो महाजनो मत्तो हेलया च प्रहस्य च।
कथं पृच्छसि भो दण्डिन् ! मुद्रां किं लब्धु-
मिच्छसि॥
लतापत्रादिकञ्चैव वर्त्तते तरणौ मम।
निष्ठुरञ्च वचः श्रुत्वा सत्यं भवतु ते वचः॥
एवमुक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः।
कियद्दूरे ततो गत्वा स्थितः सिन्धुसमीपतः॥
गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा।
उत्थितस्तरणीं दृष्ट्वा विस्मयं परमं ययौ॥
लतापत्रादिकं दृष्ट्वा मूर्च्छितो न्यपतद्भुवि।
लब्धसंज्ञो वणिक्पुत्त्रस्ततश्चिन्तापरोऽभवत्॥
स्वश्वुरं दुहितुः कान्तो वचनञ्चेदमब्रवीत्॥

जामातोवाच।

किमर्थं कुरुते शोकं शापादेतञ्च दण्डिनः।
शक्यते तेन सर्व्वं हि कर्त्तुं हर्त्तुं न संशयः॥
तस्तच्छरणं यामो वाञ्छितार्थो भविष्यति।
जामातुश्च वचः श्रुत्वा तत्सकाशं गतस्तदा॥
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम्।
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ॥
मया दुरात्मना देव मुग्धोऽहं तव मायया।
यदुक्तं तद्वचो नाथ दुष्टं मे क्षन्तुमर्हसि॥
यतः परहिताः सर्वे क्षमासारा हि साधवः।
पुनः पुनस्ततो नत्वा रुरोद शोकविह्वलः॥
तमुवाच ततो दण्डी विलपन्तं विलोक्य च।
मा रोदीः शृणु मे वाक्यं मम पूजापराङ्मुखः॥
मामवज्ञाय दुर्बुद्धे ! लब्धं दुःखं मुहुर्मुहुः।
तत् श्रुत्वा भगवद्वाक्यं स्तुतिं कर्त्तुं समुद्यतः॥

साधुरुवाच।

त्वन्मायामोहिताः सर्व्वे ब्रह्माद्यास्त्रिदिवौकसः।
न जानन्ति गुणं रूपं तवाश्चर्य्यमिदं प्रभो॥
मूढ़ोऽहं त्वां कथं जाने मोहितस्तव मायया।
प्रसीद पूजयिष्यामि यथाविभवविस्तरैः॥
पुत्त्रं वित्तञ्च मच्चित्तं पाहि मां शरणागतम्॥
श्रुत्वा भक्तियुतं वाक्यं परितुष्टो जनार्द्दनः।
वरञ्च वाञ्छितं दत्त्वा तत्रैवान्तरधीयत॥
ततोऽसौ नावमारुह्य दृष्ट्वा रत्नादिपूरिताम्।
कृपया सत्यदेवस्य यत् फलं वाञ्छितं मम॥
इत्युक्त्वा स्वजनैः सार्द्धं पूजां कृत्वा यथाविधि।
हर्षेण महता साधुः प्रयाणं चाकरोत् द्विजः॥
नावं संयोज्य वेगेन स्वदेशमगमत्तदा॥
ततो जामातरं प्राह पश्य वत्स पुरीं मम।
दूतञ्च प्रेरयामास निजवित्तस्य रक्षकम्॥
ततोऽसौ नगरं गत्वा साधुभार्य्यां विलोक्य च।
उवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा॥
निकटे नगरस्यैव जामात्रा सहितो वणिक्।
आगतौ बन्धुवर्गैश्च धनैर्बहुविधैस्तथा॥
श्रुत्वा दूतमुखाद्वाक्यं महाहर्षयुता सती।
सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति।
व्रजामि शीघ्रमागच्छ साधुसन्दर्शनाय च॥
इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च।
प्रसादं संपरित्यज्य गता सा च पतिं प्रति॥
तेन रुष्टः सत्यदेवो भर्त्तारं तरणीन्तथा।
संहृत्य च धनैः सार्द्धं जले तस्मिन् समर्पयत्॥
ततः कलावतीकन्या नालोक्य वणिजं पतिम्।
शोकेन महता तत्र रुदन्ती चापतद्भुवि॥
दृष्ट्वा तथाविधां कन्यां न दृष्ट्वा तत्पतिं तरीम्।
भीतेन महता साधुः किमाश्चर्य्यमिदं महत्॥
चिन्त्यमानास्ते सर्व्वे बभूवुस्तरिवाहकाः।
ततो लीलावती साध्वी दृष्ट्वा तद्विह्वला सती।
विललापातिदुःखेन भर्त्तारञ्चेदमब्रवीत्॥
इदानीं नौकया सार्द्धमदृश्योऽभूदलक्षितम्।
न जाने केन दैवेन हेलया वापहारितम्॥
सत्यदेवस्य माहात्म्यं किं ज्ञातुं नहि शक्यते।
इत्युक्त्वा विललापाथ ततश्चा स्वजनैः सह॥
ततो लीलावती कन्यां क्रोड़े कृत्वा रुरोद च।
ततः कलावती कन्या नष्टे स्वामिनि दुःखिता॥
गृहीत्वा पादुकां तस्य अनुगन्तुं मनो दधे।
कन्यायाश्चरितं दृष्ट्वा सभार्य्यः सुजनो वणिक्॥
अतिशोकेन सन्तप्तश्चिन्तयामास धर्म्मवित्॥
हृतो हि सत्यदेवेन जामाता सत्यमायया।
सत्यपूजां करिष्यामि यथाविभवविस्तरैः॥
इति सर्व्वान् समाहूय कथितञ्च मनोरथम्।
नत्वा च दण्डवद्भूमौ सत्यदेवं पुनः पुनः॥
ततस्तुष्टः सत्यदेवो गगनाद्वणिजं प्रति।
जगाद वचनञ्चेदं नैवेद्यमवमन्य च।
आगता स्वामिनं द्रष्टुमतोऽदृश्योऽभवत् प्रभुः॥
गृहं गत्वा प्रसादञ्च भुक्त्वा चायाति सा पुनः।
लब्धभर्त्तृसुता साधो भविष्यति न संशयः॥
ततश्च प्राचदं वाक्यं श्रुत्वा गगनमण्डलात्।
क्षिप्रं तदा गृहं गत्वा प्रसादं प्रतिभुज्य च॥
अपश्यत् पुनरागत्य पतिं नावं जनैः सह।
ततः कलावती तुष्टा जगाद पितरं प्रति॥
एहि तात गृहं याहि विलम्बं कुरुषे कथम्।
तत् श्रुत्वा कन्यकावाक्यं सन्तुष्टोऽभूद्वणिक्सुतः
पूजनं सत्यदेवस्य कृत्वा विधिविधानतः।
धनैर्बन्धुगणैः सार्द्धं जगाम निजमन्दिरम्॥
पौर्णमास्याञ्च संक्रान्त्यां पूजां कृत्वा यथाविधि।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे श्रीसत्यनारा-
यण कथायां वणिक्साधुमोचवर्णनो नाम
३ अध्यायः ॥*॥

सूत उवाच।

"अथ चान्यत् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः।
आसीद्दंशध्वजो राजा प्रजापालनतत्परः॥
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः।
एकदा स वनं गत्वा हत्वा च विविधान् मृगान्
आगत्य वटमूले च दृष्ट्वा सत्यस्य पूजनम्।
गोपाः कुर्व्वन्ति सन्तुष्टा भक्तियुक्ताः सबान्धवाः
राजा दृष्ट्वा तु दर्पेण नागतो न ननाम सः।
ततो गोपगणाः सर्व्वे प्रसादं नृपसन्निधौ॥
संस्थाप्य पुनरागत्य भुक्त्वा सर्व्वे यथेप्सितम्।
ततः प्रसादं संत्यज्य राजा दुःखमवाप सः॥
तस्य पुत्त्रशतं नष्टं धनधान्यादिकञ्च यत्।
सत्यदेवेन तत् सर्व्वं नाशितं मम निश्चितम्॥
अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्।
मनसेति विनिश्चित्य ययौ गोपालसन्निधिम्॥
ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह।
भक्तिश्रद्धान्वितो भूत्वा चकार विधिवन्नृपः॥
सत्यदेवप्रसादेन धनपुत्त्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते विष्णुपुरं ययौ॥
य इदं कुरुते सत्यव्रतं परमदुर्लभम्।
शृणोति च कथां पुण्यां भक्तिमुक्तिफलप्रदाम्॥
धनधान्यादिकं तस्य भवेत् सत्यप्रसादतः।
दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत सत्यमेतन्न संशयः।
ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत्॥
इति वः कथितं विप्राः सत्यनारासवव्रतम्।
यत् कृत्वा सर्व्वदुःखेभ्यो मुक्तो भवति मानवः॥
विशेषतः कलियुगे सत्यपूजाकथाफलम्।
सत्यनारायणं केचित् सत्यदेवं तथापरे॥